# 22 - द्वाविंश दशकम्
# अजामिल उपाख्यानम्

अजामिलो नाम महीसुरः पुरा
चरन् विभो धर्म पथान् गृहाश्रमी ।
गुरोर् गिरा कानन मेत्य दृष्टवान्
सुधृष्ट शीलां कुलटां मदाकुलाम् ॥ ॥22-1॥

स्वतः प्रशान्तोऽपि तदा हृताशयः
स्वधर्म मुत्सृज्य तया समारमन् ।
अधर्मकारी दशमी भवन् पुनः
दधौ भवन्नाम युते सुते रतिम् ॥ ॥22-2॥

स मृत्युकाले यमराज किङ्करान्
भयङ्करां स्त्रीन् अभिलक्षयन् भिया ।
पुरा मनाक् त्वत् स्मृति वासना बलात्
जुहाव नारायण नामकं सुतम् ॥ ॥22-3॥

दुराशयस् यापि तदात्य निर्गतः
त्वदीय नामाक्षर मात्र वैभवात् ।
पुरोऽभिपेतुर् भवदीय पार्षदाः
चतुर्भुजाः पीतपटा मनोरमाः ॥ ॥22-4॥

अमुं च संपाश्य विकर्षतो भटान्
विमुञ्चतेत्या रुरुधुर् बला दमी ।
निवारितास्ते च भवज्जनैस् तदा
तदीय पापं निखिलं न्यवेदयन् ॥ ॥22-5॥

भवन्तु पापानि कथं तु निष्कृते
कृतेऽपि भो दण्डन मस्ति पण्डिताः ।
स निष्कृतिः किं विदिता भवादृशाम्
इति प्रभो त्वत् पुरुषा बभाषिरे ॥ ॥22-6॥

श्रुति स्मृतिभ्यां विहिता व्रतादयः
पुनन्ति पापं न लुनन्ति वासनाम् ।
अनन्त सेवा तु निकृन्तति द्वयीम्
इति प्रभो त्वत् पुरुषा बभाषिरे ॥ ॥22-7॥

अनेन भो जन्म सहस्र कोटिभिः
कृतेषु पापेष्वपि निष्कृतिः कृता ।
यदग्रहीन् नाम भयाकुलो हरेः
इति प्रभो त्वत् पुरुषा बभाषिरे ॥ ॥22-8॥

नृणा मबुद्ध्यापि मुकुन्द कीर्तनं
दहत्य घौघान् महिमास्य तादृशः ।
यथाग्नि रेधांसि यथौषधं गदान्
इति प्रभो त्वत् पुरुषा बभाषिरे ॥ ॥22-9॥

इतीरितैर् याम्य भटै रपासृते
भवद् भटानां च गणे तिरोहिते ।
भवत् स्मृतिं कंचन काल माचरन्
भवत्पदं प्रापि भवत्भटै रसौ ॥ ॥22-10॥

स्वकिङ्क रावेदन शङ्कितो यम:
त्वदंघ्रि भक्तेषु न गम्यता मिति ।
स्वकीय भृत्यान् नशिशिक्ष दुच्चकै:
स देव वातालय नाथ पाहि माम् ॥ ॥22-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥